सितं कथमेकस्यां ज्ञानव्यक्तौ स्यात् अत एव तत्तत्प्रकारकत्वं च तस्य तावत्सदाधर्मोपदेशाद्वेदस्य प्राप्तम् ज्ञानव्यक्तिभेदापत्तेः अ-
स्त्वेवमपीति चेन्न हि ज्ञानभेदे केऽलाघवादिस्त्वनुपपन्नं सर्वत्रैकज्ञानानां सप्रकारकत्वनियमेन कार्यजनकज्ञानानामपि सप्रकार-
काणां नानात्वापत्तेः वाचस्पतिमिश्रास्तु ज्ञानस्य विषयनियमः कारणाधीनो नित्यस्य तदभावादनियतविषयत्वमित्याहुः तन्न एवं स-
ति जन्यज्ञानस्य कुत्रचित्किंचित्प्रकारकत्वं तत्कारणविषयाधीनमिति नित्यस्य तदभावात्सर्वप्रकारकतापत्तेरीश्वरे भ्रमस्याप्यापत्तेः
अयथार्थभ्रमविदोषाधीनमिति तदपि तदभावेऽस्या निवर्तत इति चेत् तर्हि भ्रमप्रमाविषयतानियामकमेव स्यात् तत्प्रकारकताया अपि
कारणाधीनत्वात् परिच्छिन्नप्रकारताजनककारणाधीनास्वरूपसत्त्वं धात्मकं तदप्रामाण्यकोदोषः न चैवं नित्यज्ञानस्य तत्तद्विषयत्वे तत्प्रयोज-
ककारणाधीनं तदस्य विषयताविरहस्तत्प्रयोजककारणविरहात् तथा च तत्तद्विषयत्वनियामकस्याभावादनियतविषयत्वनि-
वर्तत इति सर्वविषयत्वं तदस्य विषयत्वापातान् दोषाप्रयोज्या भ्रमताप्रयोज्या प्रमा यतो जन्या यो नास्ति सा नित्यज्ञानेऽपि नास्ति

सि० १० दोषजन्यत्वविरहादेवेति न भ्रमत्वमिति तच्च ज्ञानस्यानियतविषयत्वे यदि सर्वविषयत्वे तदास्माकमस्मत्प्रमाणाजन्यज्ञानवतोऽपि सार्वज्ञ्यापत्ति
२८ रिप्सितादृशसर्वज्ञस्याभावे जीवेनार्थानितरत्तात्सर्वप्रकारकज्ञानवत्त्वानुमितिनामप्रमानुः सार्वज्ञ्येन प्रमातुश्शक्येति युक्तिः सोऽपि नाधिकमिति चेदिति स
र्वं संशयविरोधिज्ञानत्वमेव सर्वविषयत्वमिति चेत्सत्यं तिरस्कृत्यं किंचित्त्वं इन्तावदप्रसिद्धं नानुमानगम्यं यः सर्वज्ञ इति श्रुतिस्तु नैवंरूपताविषयः
पदार्थवाक्यार्थरूपाभ्यां भिन्नत्वात् एवं यैः केवलं ज्ञानमिति द्विधा घ्नपोह्यिणः सूक्ष्माभीतादिविषयं जीवस्य परिकल्पितं तदप्यपात्वविज्ञ
ज्ञेयेन हितत्रापि यत्नमा एवं किल त्वं केषांचिद्दर्शने बोधस्वभावः पुरुषो देहेन्द्रियादिवशः किंचिदेव जानाति विगलितनिखिलकर
28 णकलेवरादिस्तु केवलीभूतो विश्वमेव सूक्ष्मातीतादिरूपमपरोक्षमीक्षते तच्च केवलजीवज्ञाने केवलज्ञानमिति मुक्तात्मना सर्व
गोचरं ज्ञानमाचक्षते तत्रापि प्रमाणाभावः प्रत्युतस्यादर्शने तिनेति भेदस्य पंचविलयवेदांतेषूपदिश्यत इति तद्व्यतिरिक्तातीतादिशू
न्यस्य प्रमाणाभावात् स्वभावेऽपि नसहं वैधाभावात् कथं तज्ज्ञाने न सर्वज्ञता अथ बोधस्वभावस्य किं संबंधानोऽणन चेवं पुनरपि वैधाप
त्तिः अखिलकर्मक्षणात्तदर्जितकारणानां देहस्य वा भावादिति चेत्तन्मुक्तस्य बोधरूपता यदि विदेहेनावगम्यते तदा तस्यासंगतापि तत
एवावगम्यत इति कुतः अपवर्गविषयतामप्रमाणानां तत्तु तत्स्वबोधरूपत्वेनास्त्येवेति कुतः सर्वविषयत्वमिति तस्मान्नैतत्ते वाङ्गीद्रिया एम०
विषयाः अथाभावः एवं भावाच्च मन्तव्यमिति भिन्नोऽभिन्नो वा तत्र आद्ये न त्वया संतमभेदोऽस्ति तथात्वादिविशिष्टादिहापिनः घटादिकमेव हि कदाचित्स्व दा २८

त्मना गत्ये ते घटोऽस्तीत्याद्याकारेण कदाचित् अभावात्मना घटो नास्तीति कोऽर्थः घटः भावात्मनास्तीत्यर्थः न त्वभावः पदार्थान्तरं प्रमाणा
भावात् किं त्वभावत्वं भावत्वमिव धर्मविशेषः एकस्मिन् धर्मिणि धर्मद्वयकल्पनयैवोपपत्तेः न च विरुद्धं द्वयं प्रमाणबलेनाविरुद्धतयैवाति
द्धेः अभावो नाम भावोऽपि च घटाद्यात्मकं भावान्तरमेव अभावो नाम भावत्वेन तु तस्य क्रमतो नानानुगमः तदाहुः भावान्तरमभावोऽन्यो न कश्चिदनि
रूपणादिति अभावो हि न कश्चिदतिरिक्तः कुतः अतिरिक्तस्य तत्त्वेन तस्याभावादस्य तत्तद्भिन्नत्वेन गवाश्वयोरिवाप्रतीतेः न च नास्ति अभावो भा
वप्रतीतेः सालेवनलात् नहि कोऽसौ भावान्तरं पटे पटस्य घटभेदबुद्धिस्तद्भिन्नो भावः इत्यर्थः प्रत्युत घटो नेत्यस्य घटो घटभेदाभिन्न इत्यर्थः तदाहुः
धर्मयोर्भेद इष्टो हि धर्मभेदेऽपि न स्थितेः अमद्विपटादेर्धर्मिण एकस्यैव घटादिरूपत्वमसत्त्वं भेदत्वमित्यर्थः न घटसंसर्गाभावानधिकरणेति तु न
घटाभावत्वे अनुगतप्रतीतेर्घटात्मकाभावविषयत्वेनैवोपपत्तेः योग्यानुपलब्धेश्चाभावत्वमेव विषयं इमम् एव अयं घटत्वेन नास्तीति
प्रतीतेरप्यवोऽपि घटत्वात्मनाभावात्मकत्वस्यैव विषयः तर्हि घटस्वात्मनास्त्येवास्ति किल स्वात्मनेति तदाहुः स्वरूपपररूपाभ्यां नित्यं सदसदा
त्मके वस्तुनि ज्ञायते किंचित् किंचिद्रूपं कदाचनेति एवं च प्रतियोगिवत्ति घटाभावो नास्तीति प्रतीतिरभावत्वप्रकारिका घटविषयिणीत्यपि
प्रमेयत्वेति तेनैवोपपत्तौ नाभावाभावः स्वतन्त्रः सिध्यति ध्वंसोऽपि च विनाशाख्यक्रियायोगात् घटादिरेवेत्युक्ते एवं च घटो नास्ति घटो न स्त
इत्याद्योऽनार्थसंख्यो न्यायोऽपि तत्रैवास्मिन्निति का भाववादिनां तु तत्र तु घटता अभावप्रतियोगी घटोऽस्तीत्येवाभ्युपगम्यते तदाप्यनुपपत्तिः

मो० र०
२९

29

तादृशश्च ब्रह्माहंकारशून्यतमस्तस्य समस्तयोग्यंसन्निकर्षे रागमतियोगिविशेषकलायोगात् पाशबन्धस्य ध्वंसास्यापः कालः स्वं तथा मलपः
पावकुभाव ध्वंसात्स्वपः कालस्तु महामलपः इमा वस्तुते वैशेषिकाः ननु तत्काले जातिः कुतस्स्यादिति न च काल एव तत्स्यात् व्यक्तिमात्रभेद
शालात् न च न श्रुतिनिमित्तत्वात् नावेशे च तस्मात् स्वच्छिकाले सचिर पिण्डे व्येति जातिशक्त्युपदानानां नार्थनापत्तिरिति वेशकाल स सर्वो
धिकरणात् तथा समितेस्तस्या व्यक्तिमात्रदेशतो नं गोकारादिः स्यात् तत्र तादृशकाले समवायाभावात् तदाहुः मलयेऽपि समावेशः सर्वो
च्छेदात्मकेन हि न च समयोजनं तेन स्यात्समनापतिकर्मणां सर्वमलापविज्ञानं समस्तजगदात्मरूपं स्वशरीरविदं प्रमातान्नाधिकेशतो ११ अत्र
इति स्वआत्माशरीरस्यात्मन स्वभेदवेदनादेवापवर्गस्यात्मनः प्रहाहिश्शरीरैः स्वनिमात्मसुखितस्तव मतपापविलीयते तदाप्रहासवः स्वहेतु
भ्यः कर्मभ्यो विनिवर्तते तदा हेलभावादेवमुच्यत इति शारीरात्मविकज्ञानमेवार्थनीयं नाम तदा किमनेन व्युत्क्रामेण भेदाभिनयसंगत्या
ऽभ्युपगमेनामामातिक्रमध्यानापरनामधेय १२ प्रापुहूषविवेकेनेति अत्र वत्स भावापोः सर्वे परमाणवः कदाचित् समग्रोपादेयमेव
धर्ममात्रं भकलात् तेनैव पवनार भकपरमाणुवद्दिति मलये अनुमानं समाणमित्याहुः अत्र पथष्येककालीन समग्रोपादेयस्य
मलं न मा हि च्छिन्नमग्रोपादेयमेव धर्मसंगमाणाभावात् तदाहुः मलयेपि प्रमाणानः सर्वोच्छेदात्मकेन हि न च समयोजनं तेन २९
स्यात्समनापतिकर्मणां सर्वमलपविज्ञानं समस्तजगदात्मरूपं स्वशरीरविदं प्रमातान्नाधिकेशतो १ पुस्ते इति स्वआत्माशरीरस्यात्मन

त्वभेदवेदत्वादिवापवर्गप्राप्तेः परादिशरीरैः सनित्यात्मसुखविमहत्त्वमतयोर्विलीयेते तदापत्तावदृष्टहेतुभ्यः कर्मभ्योविनिवर्त्ततेतदाहे
तभावादेवमुच्यतइतिप्राणिनात्मविकज्ञानमेवार्थनीयंनामतदाकिमनेनव्यक्ताव्यक्तभेदभिन्नसंसाराभ्युपगमेनाप्रामाणिकमधाना
परनामधेयगुणपुरुषविवेकेनेति अत्रवक्तव्यमाचार्याः सर्वेपरमाणवः कदाचित्समव्याप्तोपादेयमवंधम्ममाः आरंभकवादनषपवु
नारंभकप्रमाणवदितिप्रत्यये गनुमानेनप्रमाणामितसाहुः अत्रपघपेककालीनसमव्याप्तोपादेयममत्वेनपक्षसिद्धमितिसमव्याप्तोपादेय
मवंधम्मत्वंसाध्यंतथाचक्रमेणतादृशसाध्यसत्तात्तिद्धसाधनंतथापेककालीनाइतिपक्षविशेषणांवोध्यं पक्षतावच्छेदेन
साध्यसिद्धेर्दृष्टान्तासिद्धसाधनमिति अत्रपघ्नपितथापेककालत्वस्यभकः कालोपाधिः पक्षतावच्छेदकः दृष्टाधिकरणीभूतत्व
द्रव्योवा आद्येवाधः तादृशोपाध्यवच्छिन्नस्यकार्यत्वात् अंत्येपक्षविशेषणासिद्धिः प्रलयास्मिद्धेरिति दूषणं कालोपाधित्वेनप्र
वेशात् अवैयर्थात् द्वितीयमादायोपसाध्यपर्वसानान्नतथापिकार्यद्रव्याधिकरणवृत्तिलमात्रोपाधिः अप्रयोजकत्वंच अ
नवयमाणुः कार्यद्रव्यसमानकालीनपरमाणुक्रियाजनितानवयक्रियापात् सर्वेस्वादिसंवातारमलयेपरमाणुःकार्यसमानकाली
नतद्धर्मिध्वंसासमवधानसवानितिमहाप्रलयेसाधनंकमसकस्यविद्याप्तेः अप्रयोजकत्वेतदसगयावत्त्वसोपाधित्वात् एतेनएतेपरमा
णवः कार्यद्रव्यानधिकरणवृत्तिकार्यवंतः नित्यद्रव्यत्वादाकाशवदित्यपि नापाध्यपि कार्याद्रव्यानधिकरणस्योपाधित्वात् अ

मी.१० यकार्यत्वेश्वरात्मनिकार्यत्वस्यानधिकरणवृत्तिध्वंसप्रतियोगिनिकार्यत्वभावत्वात् ध्वंसप्रतियोगित्वाद्घटवदित्यत्र नचाकाशवृत्तिध्वंसप्र
३० तियोगित्वेनार्थान्तरतावाधात् नचविभुवृत्तित्वमुपाधिः परमाणुसंयोगादौ साध्याव्यापकत्वात् नचगगनादिवृत्तिध्वंसप्रतियोग्यवृत्ति
त्वस्यतत्कार्यत्वस्यानधिकरणप्रागभावाधिकरणवृत्तिध्वंसप्रतियोगिवृत्तित्वे सतीतत्कार्यसमवेतत्वात् दनादिनावच्छेदकत्वात् गगनादि
वृत्तिप्रागभावप्रतियोग्यपुरः कार्यानधिकरणवृत्तिप्रागभावप्रतियोगिकार्यत्वात् घटवदित्यनुमानमस्त्विति चेन्नाप्रयोजक
त्वात् कालोपाधित्वं कार्यत्वव्याप्यं कालोपाधिमात्रवृत्तित्वात् एतत्कालत्ववत् अत्रात्मगुणत्वेनात्मत्वाभाववदेहेतिमात्मगुण
30 मात्रवृत्तिधर्मत्वात् एतद्गुणत्ववदिति तद्धितरी तद्साधनत्वाच्च नचाप्रयोजकत्वं कार्याभावेज्ञानसामान्याभावापत्तेरिति वाच्यं किं विनाप
ज्ञातिरिति वृत्तितस्माद्युत्तमभेदात् व्यक्तिमात्रनिष्ठत्वात् प्रतीयपाकदाचिदृष्टेपि गोत्वं स्यादितमाषुवृत्तित्वमथाज्ञात्मगुणत्वस्यनाना
त्वापत्तेरिमन्वकुल्यतर्कसत्वात् आगमत्वानुमानोपष्टंभकत्वान्नाप्रयोजकत्वमनुमानानामितिचेन्न तन्निष्ठत्वप्रयोजकस्य घटत्वादेर्च्छेदा
दागमस्याप्रमाणापत्तेर्नतमात्रत्वं किंतुकर्मणः प्रत्यक्षापरत्वमेवनत्वसर्वइहशंकर्मपरत्वमवादारूपेलोपभोगायसिन्नतिविरुद्धेनफल
मिसेतमतः किंवाजगद्रूपाप्रपाएवतदाहुः स्मृतिवाक्यपरत्वेवजनानामितिविभ्रमः पौर्वापर्यापरामर्शः शब्दोतांकुरुतेमतिमिति एमं
नचेश्वरएवप्रयोजकत्वहृत्ताप्यपत्युमादपतीतिवाक्यं नानाहेत्वीयमुत्पादनापत्तेरीश्वरीयानेतशरीरकल्पनापातात् अथनानाहे ३०

शीघ्रशरीरारंभे वा विशेषप्रसाद्यतीति चेदिदमपि न प्रमाणेन विना शक्यं वोढुं घटत इत्यादि तं प्रत्याह यं प्रमपि मानाकायकल्पनाऽऽवेशकल्प
नानास्वेवाधिका । अपि चागमं विनाऽप्रयोजककारणमात्रसहस्रात् न तत्सिद्धिरित्यागमस्यापि प्रमाणत्वं प्रकर्षं वैदिकमन्त्रप्रदायेपविनेवितितदुपपत्तयेप्र
लपो नास्तीत्येवं निर्द्धार्यमितिदिक् । अभावप्रत्यक्षत्रिसरमप्रमाणार्थोपि त्वाप्नुपपत्त्यत्वेत दुःखाधिकरणत्वात्प्राणात्प्रवृत्तिः स्वाप्तपत्तमवृत्तदुःखाधिक
रणा स्मृणा हतिभ्यो भिन्ना वापोद्धुः स्वध्वंसो मोक्षापरनामा तस्य चोत्पत्तिमकारणे वार्त्तिकेवाणितः तत्रज्ञानात्मतत्त्वाना भोगात्स्वर्ग्वत्रियाखये उ
नाम च यामसत्तादृहो नोत्पद्यते पुनः कर्मजन्मा पभोगार्थे शरीरं न प्रवर्त्तेते तदभावेन कश्चिद्धिदे तु स्तत्रावति एते मोक्षापरनाम वर्त्तेत तत्र का
म्यनिषिद्धयोः नित्यनैमित्तिके कुर्यान्मत्सवायजिहासया मार्ग्यमाने फलं स्यात्तेन चानिष्टो भविष्यति । आत्मज्ञे चैतदस्तीति तत्ज्ञानस्य उपयुज्य
मइति । ननु कर्मणां नेदेहकारणत्वे किं तु स्वर्गादिकारणत्वमेव प्रपद्यते न च तत्र देवान्तरव्यापारस्तत्र । सत्यमैहिककर्मफलं सोढव्यमन्त्येन नापि श
रीरफलकर्मेव किंचित्कर्मास्ति । अतः सत्यपि कर्मसुपेशरीरं स्यादेवेत्याशंक्याह कर्मजन्मेति कर्मशेषफलोपभोगार्थे हि शरीरं जायते अशेषक
र्माभावे तु शरीरं न जायते कारणाभावात् न च मातापितृसंयोगमात्रं तत्र हेतुर्व्यभिचारादित्याह न कश्चिद्धेतुरत्रास्ति उत्तरश्च यासत्त्वविकृणो
मोक्षापवर्ग निकाम्यस्य तं चेष्टे तु त्वफलबीजानि विरुद्धस्यापवादेन हेतुत्वमिति निष्प्रवर्त्ततामनिशं नैमित्तिकेषादि कुर्यान्न तदा तत्रापत्यानुषंगि
कफलं नस्यबंधहेतोः एतेन नए एव दोषः अथ नेअपि त्याज्येतदा प्रत्यवायाद्धरिते स्यादेदुर्वार इत्याशंक्याह पंचैव पारिहारमाह नित्यसाहिनामप्रविष्य

गी० १८ नीतादिनित्यनैमित्तिकेष्वत्यवाप्यजिहासया काम्येष्वप्यनुकामार्थमर्पितयोः प्रयोगः प्रत्याख्यः न च तथापि नित्यप्रयोगेपि कर्मणामेकत्वात् काम्य
३१ फलं स्यात् तस्मामर्योमसत्वाभरकाम्यफलकामनाध्वंसमाणाभावादित्याशंक्योक्तेमार्थ्यमानस्य फलत्वानास्ति विधिनासमर्पितस्यैवमाव्य
मानलब्धबोधनादित्याशयः पशुस्वर्गकामादिश्रुतिभ्य उपादेयमनत्यकर्तुर्विशेषणीभूताकामना प्रपतेत्यापश्ये कलबुद्धिवस्मितेतितज्ज्ञात्विंतुवा
दापाणोगविशेषात् तस्मात्स्यापिभतीयेते तिवादाय णाधिकरणाविरुद्धं तदिहहेत्वभावादेवं वधाभावो नतात्मज्ञानस्यात्र कारणतामि
३ त्युपसंहरति आत्मज्ञैवेतदिति तज्ज्ञानेनात्मज्ञानं न तु पशूतिशुद्धज्ञानं अपमाशयः जीवोहिशरीरमेवात्मानं मन्यमानस्तद्रूपकारणोपका
रात्मकगोचरोभवति तं दधान स्वदुपकारिणोरप्रतेगपकारिणांचद्वेष्टि पदाशरीरातिरिक्तमात्मानमनुपकारापकारयोगोचरमयमस्मीति वेत्ति तदाहं
कारायणमममकारोविगत्यादिगोचरोपेतितिदेहमेवग्रपंततदा ममेतिन वेदकुतः पुनस्तत्कारणत्वादीतदाचायं स्थिरं मचित कुशलाकुशलत्वक
मोपस्थापितं फलं स समत्वबुद्धिर्भूत्वा भुंक्ते अनागतानि च अभयविधामपिकर्माणि नं सचिनोति एवं फलोदयनिरुद्धेमार्थीनकर्मणि अनागते च
कारणाभावात् तुमशरीरेनपुनस्तद्धेतुको स्यशरीरसंबंधो जीवनायमत्लतोदुःखोपरमः तदेवंमणामात्मज्ञानस्य मोक्षोपयोगः इमनेवार्थंश्रुतिर
नुवदति आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदितितदेवं कर्मस्वर्पमेवात्मज्ञानेनसंगात्मो से उप राम
युज्यते आत्मस्यबहिर्मनोनित्यनैमित्तिकमात्रानुष्ठापीकाम्यनिषिद्धेभ्यो निवर्तते ततो हेत्वभावान्मुच्यते आत्मज्ञानेकार्येकर्मानुष्ठानेचेतिरहितोप ३१

ज्ञाकर्मसमुच्चयपरस्त्वेके तच्चेदं साख्ययत्नदृष्टया योगं तन्त्रवार्त्तिककृतां मते यदाहुः कृतार्थं पुरुषार्थं च तत्त्वं योगपदप्राप्तः सर्वत्रैव विज्ञानेन संस्कार
लेनगम्यते यागं गंभीरात्मविज्ञानादस्मत्तेष्ववधार्यतां आत्मज्ञानं हि कृतार्थं पुरुषार्थं न प्राज्ञा यते तेन विना परलोकफलेषु कर्मसु प्रवृत्तिर्निःस्व
संभवात् तेनाविनाशीव ओं परमात्मा इत्यादिवाक्येनमात्मज्ञानं तदप्युपनिविधिवज्ज्योदेव कर्मज्ञानं वत्तदप्युपन विधिवल्लोटेव कर्मज्ञानवत्तामप्य
व्यकृतार्थं यत्तु आत्मस्वरूपावगतिर्यादनावसरे विधिः संपर्वाक्यं आत्मा ओद्रष्टव्य इत्यादि नवद्रष्टव्यमागतस्वार्थस्याति गहनता महोपयोगिता
चाल्पस्य हि तावद्वा विशेषेणावश्यमागमर्थं प्रतिपद्यताभिसेतावन्मात्रार्थं अन्यथा हि अप्रयापतो जानन्नपि अतिरिक्तमात्मानं स्वर्गादिकं नपिबोधनि
बध्यः शरीरमात्मानमभिमन्यत एवेति कदाचिदतिक्रामेदपि प्रमादवशविधिनिषेधावितितत्त्वि हृत्पेयपमुपदेशाः दुरधिगमः स्वल्पपमगोचरे
धीतानामपि देहगुहानिहितः पण्डितोऽपि पुरुषो न स्पष्टीवानेव हितामपि समग्रमादार्थमेवात्मज्ञानोपदेश इति साधुभाषणानि यमवते यथा हि सा
धोर्निमयमामेमाधोऽस्वाम्यसंगात् ग्रामादिकाः साधुभाषणानि नहि समर्थमात्मसमायत्तु साधुशब्दमिमेवंविनियमस्तथैषामाशयेन यतुप्रयमा स्मार्ग्य हतपा
विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः तपाम्नतव्यो बोद्धव्य इत्यात्मानमुपासी
तेति कामवादसो कृतादलोकवादवचनविशेषैर्जिज्ञासामननसहितं तनिर्धूतमकलोपाधिकेवलात्मबोधपर्यंत प्रकृतत्वात्मतत्त्वस्वरूपानविधान
मनाम्यवादविहितमस्मन्नात्मेत्याकाराणि कः कृतमेव धः तदाऽऽभ्यभिधानिकृतमेवं धः सुवादिकालोपयोगमप तदस्यैवानेकान्तिककृतमेवं धा

गी॰ त्समं वंधात्क्रतुसंवंधविरोधात्मज्ञानतात्त्वतत्त्वगुणार्थमेव फलं वाभ्युदयविः श्रेयसतत्त्वं यथा सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिति तथाह
३२ परिपित लोककामो भवति संकल्पादेवास्य पितरः समुपतिष्ठंते तेन पितृलोकेन समहीयते इति तथा सत्त्वे गुणावर्त्तते यथावदा शुभं भ्रं सत्त्वलोकम
भिसंपद्यते तेन सगुणा वर्तन्ते रजस्तमः गुणात्मकापरमावस्था स्मिश्चनन्त्वात्मा कर्मतयासक्तो यतः इति कथमस्य प्रधान कर्मत्वेनेति चेन्न स
मुच्चयविनियोगभोगात् न त्वेवं ज्ञानस्यात्मनः कश्चिद्विनियोजकं विरहितं भवति वा तथात्मा ज्ञानस्य स्मैतन्मोक्षार्थमेव बोधितमि
त्येतत्कथं वार्तिककृतो व्याकरणाधिकारिणो पलव्वचनविरुद्धविज्ञानान्मोक्षो वेदनेन वो यत इति सांख्यमतं दूषयित्वा तस्मात्कर्मसमुच्चयादेव
हेतुभावेन मुच्यते न तत्स्वभावात्मकं मुक्तो मोक्षो नित्यत्वकारणमिति सुक्तं तदपि स्वमतत्वे विरुद्धं स्यात् ज्ञानस्य मोक्षहेतुतायाः स्वयमेवोक्त
त्वात् यदि वा भावस्य मोक्षता स्वमतास्यानतदानवक्रियमाणः कस्याश्चिद्भावः फलमिष्यते इति च विरुद्धमेतज्ज्ञानकर्मसमुच्चयवादिनां
मोक्षमतिकर्मणोपि हेतुत्वात् तथा च व्याकरणाधिकारिणो न हि ज्ञानविधाने नकर्मसंबंधकारणमिति तेन सांख्यमतपरिष्कारमेवं द्वार्त्तिकं
यतः शुद्धं स्वमकृतस्य तज्ज्ञानं वेदनमोक्षहेतुतया न विहितं न चालौकिकेर्थे प्रमाणान्तरं क्रमते अतोस्य ज्ञानस्य यत्र प्रसक्ततः सामर्थ्यम
सीयते नदृष्टवत्तवमते मोक्षः स्वभावात्मक एवं भवति तदेवोपपादयति तत्रेति तस्मिन्कापिलमते विज्ञानमात्मनोकर्तृत्वं तथैस्य पर्यं राम
दाहिम कृतेविविक्तः प्रकृतेर्ज्ञानतस्तदा पुरुषस्य तत्कृतकर्मफलोपभोगाभावो न प्रकृतिः कर्मारंभते तदर्थाहितस्याः प्रवृत्तिर्निवृत्तार्थतस्या आ ३२

32

स्यात्तस्मात्स्थितमुत्तरकर्मणश्चपापस्यलेपाभिनाविशेषकदर्शनापोक्तानितानि भोगादेवक्षीणानि विपाकानि वाद्भूतफलानितानिनिवृपरनिवर्तमानानि
वैस्यात्मनोभोगजनकानिविप्रारब्धवृशात्म्बजनकानितदातामपिभोगतः क्षपयितव्यानि यदिलक्षचविवेकस्यमुक्तिर्दग्धपापापिकर्माणपुन्या
पफलमर्पयितुकामानतदापिकर्मफलदोषदर्शनजातविरागः कर्मणांपशृक्ष्मसभिमानेनावर्जयति सनैर्मितिकेएवकुर्यो यथास्मदभि
मताऽस्मत्कृतिनतांस्यस्यानिमीश्वर इति अपवातेरप्यस्मदभिमतं ज्ञानमेवानापस्याडुःखाभावायास्यपमितिअस्माकंतुनापंपक्षः
तत्त्वज्ञानविधिर्वैयर्थ्यापत्तेः तर्हितस्यतत्रएवमोक्षसाधनतासमतीतेर्नोक्तहेयेषामप्रयोजकत्वमितिचेत् अआमानएवशास्त्रस्यार्थवत्वात् किं
चसाधनतावोधनस्यप्रयोजनेतत्त्वज्ञानप्रवृत्तेः प्रयोजकत्वात् ज्ञानादेवोपपत्तेः यत्तुकश्चिदाह नामोतत्त्वज्ञानजन्मः क्लृप्तादेवदुःखितात्तदुःख
स्यात्यतोभोगादेवतदिनाशसंभवात् तावभावविनातत्त्वज्ञानमहत्वेणापितद्विनाशसंभवादितितन्न द्योरसाद्यारितोमयापितिवभा
वात् स्यादितिवाच्यमेवपिस्वर्गभिस्यकारणत्वापत्तेश्चपक्ष्यस्वर्गशरीरेस्यापयापितिव्यापतेः स्वर्गसाधनतोपपाद्नार्थकल्प्यमानशरीरे
कल्पतरमप्यापतिरूपतितिचेन्नहिचाग्रदुःखध्वंससाधनतोपपत्त्यर्थकल्प्यमानपादुःखत्वावस्थालक्षणः कल्पतत्त्वज्ञानमप्यापाक्षिदुःखे
समानाधिकरणदुःखप्रागभावसमानकालीनदुःखध्वंसत्वंजन्यतावच्छेदकंमानाभावात् अप्यांशकादिदुःखप्रागसमानकालीनदुःखध्वंसत्वा
दिनामैत्राहमानकालीनघटत्वादिनाचजन्यतास्यादितिचेन्मात्वनवाजन्यतातथापिचाग्रदुःखध्वंसस्यमुक्तिनेत्नेनविनेसितद्दवश्यक

मो २०
३३
त्वं किंच यद्यपि दुःखमात्रं पापमात्रसाध्यं तथापि समानकालीनदुःखप्रागभावासहकृतिदुः खं तत्त्वज्ञानिनामेव न सर्वेषामिति तत्त्वज्ञानज
न्यदुःखमिति स्थितेन तस्य दुःखमात्रत्वेन जन्मतावच्छेदकेनापि दुःखप्रागभावसहकृतत्वमिति विशिष्य तत्तत्त्वमिति चासद्दुःखसमतदपेक्षापां
तथा च तस्यापि तज्जनकत्वं सम्यगिति तेन बाधुनीयमिति तस्मात्तत्त्वज्ञानविधिवैयर्थ्यमिति । तद्दोषः किं च तत्त्वज्ञानेन दुःखमनुत्पाद्य तत् ध्वंसत्वे
नोत्पादयितुं शक्यमिति तत्त्वज्ञानं तदुपायस्तत्प्रध्वंसः दुःखोपाये महत्त्वमनुपपत्तिः तथा च तर्हि तपःप्रभृतिषु महत्त्वमिति चेत् परलोके महात
मर्थ्यमुद्दिश्य न तु तपोजन्मं न तेन दुःखमेव नाशयितुं न बलं तमेवानर्थं विनाशयितुं तत्साधनं वा कश्चिदुपादत्ते यदाहुः मध्वालिप्तान्नाद्विषपृक्त
स्य हृद्यस्पर्शेनेव रम्यमिति अमृतपानवदनतमेव शिरस्त्राणदैस्सवर्जं तदनिवर्तेत च दुःखैकसाधनाद्बलवतो दुःखमेतान साधनाद्यानतोपि
तावतो दुःखराशेस्तस्मादेतद्विनाशस्यावश्यकत्वात् तस्यैवार्थं नामं भवान् अपवर्गमिति को दुःखवन्साधनध्वंसो मोक्षः नन्वेदं दुरितं आत्मसे
ति कल्पे च ततध्वंसस्य नतियोगिसम्बन्धिहानिर्दुरिताधिकरणात्मनो हानिरित्येवं न तु सप्रपंचसंबंधविलयः त्रैधा हि प्रपंचो जीवं बध्नाति भोगा
यतनशरीरं भोगसाधनानीन्द्रियाणि भोगाः शब्दादयो विषयाः तदस्य त्रिविधस्यापि प्रपंचस्यात्यन्तिकं संबंधस्यात्यन्तिको विल
यो मोक्षः किमिदमात्यन्तिकत्वमिति सर्वोत्सन्नानां शरीरेन्द्रियविषयाणां विनाशोऽनुसन्तानाचानुसन्तिः कथमसन्तानुसन्तिरिति चेत्तदुसार एमो
कयोर्धर्माधर्मयोर्निःशेषयोः सततपरिक्षयात् सोऽयं प्रपंचसंबंधो बधविद्विमोक्षो मोक्षः इति कस्यचिन्मीमांसकंमन्यमानस्य मनीषितं पुरा ३३

द्वेषयंशतोरिन्द्रियविषयविनाशस्य स्वतः पुरुषार्थत्वाभावेन पापस्य पुरुषार्थत्वानुपपत्तेः दुरितध्वंसस्य स्वतः पुरुषार्थत्वं प्रायश्चित्तादिफले क्लृ-
प्तत्वाद्धि दुरितध्वंसस्य दृश्यप्रायश्चित्तविधिभिर्न तस्य तत्त्वं विनापर्यवस्यतीन हि तस्य दुःखसाधनस्य नाशे दुःखं भवेदिति तस्माभवत्विति दुःख-
प्रागभावस्यापि स्वोपयोगितयैव तस्य पुरुषार्थत्वमिति वाच्यं किं हि तेन प्रागभावस्य स्थापने विनापि तेन पूर्वं तत्सत्वात दुरितोनाकाले तस्य स्थि-
तेर्दुरितनाशार्थमेवेति आणतोपातं प्रागभावस्य दुरितेनैव सहस्थितेः अप्रतिप्रायश्चित्ते दुरितेन दुःखस्य कदाचिदवश्यजनने दुःखप्राग-
भावो न स्यात् पापाद् दुःखस्याशेषकारणोपस्थितिकालीनप्रागभावसत्वे दुरितनाशव्याप्यमहत्त्विति तस्मिंस्तदभावस्य नरकभोक्तरि
सत्वादिति चेत्तस्य दुरितानतिरिक्तदुःखाशेषकारणप्रागभावस्य सत्तां दुरितध्वंसत्वव्याप्यमानेतत्कल्पनेपि दुःखप्रागभावहीने पुरुषेन
तिष्ठतीति प्रायश्चित्तेन नाशितेपि दुरिते भावशेषफलं दास्यतीति प्रायश्चित्तं व्यर्थमेव स्यात् पापध्वंसस्यैव तस्य फलं स्वजन्यजातमेव
तिच्चेत्तस्य तत्र हि स्वत एव पुरुषार्थः ननु प्रागभावस्यापकत्वात्तथा अपप्रागभावस्यापकत्वमनानन्तत्वात् दुःखदेशेनैव नमद्वृत्तिरिति चेन्नस्ता
नतोपि न प्रवृत्तिः संभवति यस्मिन् प्रायश्चित्ते कृतेपि अवश्यं दुःखभोगस्तस्मैव पापात्तस्मादाघापितदालं प्रायश्चित्तानुष्ठानमनुष्ठे-
तिविचारवतः पश्चात्तापतप्तो नराणामतीकारोपपद्यते तन्माणाद् दुःखापिप्रपाल्य दुःखसाधनमेवेति तस्मात्पापजनाद्देव पापध्वं-

मी॰ र॰ ३४ समुद्दिशति ननु दुःखसाधनत्वेन ज्ञानमपेक्षते किं वा हि कण्टकनाशादौ हि पुरुषस्य प्रवृत्तिर्न दुःखाभावोऽसंभवति विनाप्यहि कण्टकनाशे
न चिरकालं दुःखानुसारदर्शनेन तस्य तदनुष्ठानप्रयोजकत्वात् तस्माद्दुःखसाधनत्वज्ञानाद्धि कण्टकादौ द्वेषस्ततस्तदभावः पु
रुषस्येच्छति तत्साधने प्रवर्तते इत्यकामेनापि वाच्यं तत्र गमनेतराभावात् तथैव पापं दुःखजनकत्वेन ज्ञातं द्वेषविषयः इति तदभावे पुरु
षस्येच्छा ततः प्रायश्चित्ते तत्साधनत्वेन प्रवर्त्तते एवं प्रत्यवायपर्यन्तानां द्वेष्याभावत्वेन दुःखाभावसाधारणो न हि पापनाशे दुःखाभावे दुःखाभावत्वे
34 न तत्साधनेन नत्वेन गौरवात् किंच दुःखाभावेऽपि न दुःखाभावत्वेनेच्छाविषयो भोजनानन्तरीयकस्य दुःखस्याभावेऽपीच्छापत्तौ
भोजनार्थं प्रवृत्त्यभावापत्तेः किंतु द्वेष्यदुःखं तदभावत्वेनैव तथा च लाघवाद्द्वेष्याभावत्वमेव वाच्यं ततः प्रकृतार्थे तावच्छेदकं सत् दुःखाभा
वदुःखसाधनाभावसाधारणं भवतीति हि सुखाभावोऽपि द्वेष्याद्यभावत्वेन न व्रतपापेऽपि पापे द्विषसाधनत्वज्ञानाभावान्न द्वेषः संभव
तीत्याहि स्वरूपयोग्यता फलोपधानं वा नाद्यः इह हि दुःखं प्रति स्वरूपयोग्यमन फलोपधायकमिति ज्ञानेऽपि तदभावात् न द्वितीयः
प्रायश्चित्तनाश्यपापे एव फलोपधायकत्वाभावेन द्वेष्याभावापत्तेरिति वाच्यं स्वरूपयोग्यतापापे व्रतपातात् फलानुपधायकत्वनिश्चय राम॰
सत्त्वेऽपि वधकर इति नातिप्रसङ्गः नन्वेवं प्रतिप्रतियोगिनि दुरितेऽफलानुपधायकत्वनिश्चयात् द्वेषो न स्यादिति वाकस्मिन्न तद्वेकम्य ३४
ति वाच्यं सत्यपि फलानुपधायकत्वेन भिन्नप्रायाभावात् तस्य महत्त्वरूपफलत्वेन कल्पनात् यत्तु फलोपधायकत्वस्य संशयनिश्चयस्ता

धा।ात्मज्ञानमेव कारणमिति तदप्युक्तं तथा सति तदुपायेन्निः कंपयमन्नमनुपपत्तेः न च विशेषदृष्टिर्नाम कंपायमहृत्तिः न च भवं तीव्रा चिरका
लमनुवर्त्तितुमर्हतीति पर्यायपर्यायाः भवन्ति येषां पर्येषां ज्ञानसाध्यत्वाद्वेति विशिष्टश्रुत्या तथ्यं मेऽउद्देश्यो भवति जन्मते च तत्त्वज्ञानेन न तत्त्वजन्मतावच्छे
दकं न वेत्यमन्दिति न तत्त्वज्ञानेनानुमापक्षितवदाहमेव प्रापनाशकं क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति श्रुतेरिति चेन्न श्रुतिविरोधात् त
हि एवं वर्त्तेपनन्त्र स्त्नलोकमभिसंपद्यते न स पुनरावर्तते इति परमात्म्यमुपपस्य ब्रह्मलोकेनो समानस्यमात्रित्रिकाकशेषात् फलमाह नदुः ख
साधनस्य दृष्टिः तस्य निवृत्तिर्न स पुनरावर्तते इति तु ब्रह्मलोकमिति विशेषात् तस्याप्यनिवारणापत्तेर्न हि सामग्र्यभावात्तिकृतो भावश्चास्ते
भवति भावत्वात् अनादिसंसारावर्जितशुभाशुभकर्मबीजनाशत्वात् तज्ज्ञानस्य दाहत्वेन तेषु भस्मीभावे हि कारणाभावात्र वर्त्तते संसारः यः
प्रपतेत्यात्मज्ञानस्यापि कर्मशक्तिनाशकत्वात् आत्मज्ञानाग्निदग्धानि कर्मबीजानि न प्ररोहन्तीति तथा भगवता वासुदेवेनाप्युक्तं ज्ञा
नाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनेति अत्र च सर्वपदं प्रारब्धेतरपरं अन्यथा विदुषः सद्यः शरीरपातापत्तेः श्रुतिश्च तस्य तावदेव चि
रं यावन्न विमोक्ष्ये अथ संपत्स्य इति न विमोक्ष्ये न विमोक्ष्यते प्रारब्धकर्मणा अथ संपत्स्यते ब्रह्मलोकमभिसंपद्यत इत्यनेन पदुक्तं
तेनेत्यर्थः अत एव तत्त्वज्ञानस्य कायव्यूहमुत्पाद्य भोगद्वारा शुभाशुभकर्मक्षयहेतुत्वेनैवाविकोक्त्यापात्तात्तस्या कायव्यूहज्ञ
कत्वे मानाभावात् कायव्यूहे तपःसमृद्धेरेव हेतुत्वात् किंच कल्पशतास्तिरभोग्यानां नारकानन्तानां च उर्वशीभोग्यानां च स्वर्गादीनां
कायव्यूहेनैकस्मिन् भोगः संभाव्यो न च तावता लब्धदुः खहरवपरत्वेव तानिवासनितत श्चैकदा सम्प्रद्रिशति ननुदुःखसाधनत्वेनज्ञा

श्री र. २५ पितावतोभोगः संभवतीति वाच्यं भवद्भिरनुपेयेन तावता वाक्यानां स्वस्वार्थत्यागानौचित्यात् पदेवं विधात्मलाक्षणिकावृत्तादेहाकार
विगमालक्षणनिःसनैमित्तिकानुष्ठानं संभवतितदाहुः श्रीशान्तिलानभिमानी कथं कर्मणि संन्यसेत् गलितश्चात्ततदाकर्मात्रविभागर
35 त्रिकपंदृष्टायजेदिति किंवा गच्छकर्मभिः प्रयोजनं मोक्षो हि ज्ञानेनाधीनः तथाचाह नास्त्यकृतः कृतेनेति मैवं यावद्देहभाविलाद्देहका
लेषुपिः उक्तं हि ध्यानेनित्यदीकृतमनसामपि स्नानमनहितानामपि शुद्धवानश्यतीवेति तद्देवं विधानामपिच्युत्यानदर्शनाततदाचनिम
नैमित्तिकाकरणेमसवायः स्यादिति कार्याणितानिवाप्यावर्जेदीयस्युत्रिविधस्यैनसानिवर्हणाद्वारेणापवर्गमहायीभवं तेवनास्यकृतः
कृतेनेति काम्याभिमायेणज्ञानानां हितकाम्याभिमायेणवापयोगस्यकर्मभिः किंप्रयोजनं तत्रदाशोभेतयदिप्रयोजनेष्यपमतः प्रमाणान्तरेणा
निर्णीयज्ञानिनत्वकुर्युः किंत्वभयस्मृत्युक्तत्वेविधायेव ममायमेतिसाएवंवर्तेयमित्यादिनचेहांगाञ्झमादेरमाराणमस्तिनचवाध्यवा
धकभावः तथाविधानामपिव्युत्यानसंभवात् तदाचकर्मकर्त्रादिविभागज्ञानमपिसंभवतीति सर्वत्रदेहज्ञानवन्निकर्मविधान
त्वलादेवाहिदं किंचयोत्रियपुत्राणामपिसंस्कारवशादपिमहत्तेः संभवाच्चावश्यं तत्कालीनोऽध्यासोऽपेक्षणीयः इष्टसाधनता
क्षिपः संस्कारात्मनाहतसाएवाह्यादविवक्षतिहेतुत्वसंभवात् यथापुष्करपलाशइतिश्रुत्याविदेहादिमत्वमात्मविदोऽवगम्य
मे नचाभिमानादर्थदेहादिमत्वंसिद्धचैवं कर्मणोज्ञानसमुच्चयपेक्षाएवेक्षापामविषयामध्येतोत्वेतिश्रुत्याकर्मफलसंबंधाभावए राम २५

वमत्वन्तराणादेर्नोक्तो द्वारं कस्यचित्तत्त्वज्ञानेनानुष्ठानाद्देवानन्दात्मकवस्तुनः भावी नाशो लाल्लारम्भकत्वमुपपद्यते ज्ञानकर्मसमु
च्चयपक्षेन चज्ञानविधानेन कर्मस्वरूपवारणमिति ब्याकरणाधिकरणो आवर्धिलक्ष: नतु कर्मजन्यत्वे मोक्षस्य भावरूपतायां स्वर्गादिव
त्क्षयितापत्तिः जन्यत्ववज्जन्यभावत्वस्याप्यप्रयोजकत्वात् यथा जन्यत्वेन विनाशिता ध्वंसोपि न श्यति नच प्रतियोगिनः पुनरुन्मज्ज
नापत्तिः ध्वंसध्वंसस्य प्रतियोगिहत्वलानंगीकारात् नच ध्वंसप्रागभावानवच्छिन्नकालस्य प्रतियोगिकालत्वनियमः एतस्य नि
यमः स प्रतियोग्यनुपलब्धिबाधितत्वात् एवं सति लाघवसहकृतप्रमाणाभावात् इत्यपि त्यान् किंच जन्यत्वेन जन्यभावत्वेन वा ध्वंस
प्रतियोगिताकेन प्रमाणेन गम्यते घटपटादीनां ध्वंसप्रतियोगिकत्वग्राहकं प्रमाणमेव जन्यभावत्वजन्यभावमात्रयोरपि ध्वंसप्रतियोगिता
प्रतिकारणतां गृह्णातीति चेत् स्यादेवं यदि ध्वंसत्वमेकं प्रमाणसिद्धं स्यात्तदा तु वा तथापि तेन कामेन स्वर्गयोग्यस्यापि सह कार्यविरह
त्वात् उपधानं स्वर्गादेः कालविशेषावच्छिन्नत्वस्य श्रुतत्वात् सं तत्र स्वसाधनसाधनत्वानेनाकारेरपि असंतदुःखविज्ञानमेव नाश
कं कस्यचिन्मोक्षस्य तत्र न तत्पुनरावर्त्तनं इति श्रुत्या न तत्त्वबोधनाज्जन्यभावत्वेन तदनुमानमागमबाधितमेव तद्यथेह कर्मचितो
लोकः क्षीयते तथापारत्रिकमपीति सकाम्यकर्मफलस्य क्षयित्वमनुवदति अन्यथा नाहेतिश्रुतिबाधापत्तेः नच मोक्षस्यापि अवि
रोधेन विनिवेशसंभवे विरोधबाधानुचितौ वस्तुतस्तु परमानन्दरूपो मोक्षो न जन्यः सति ज्ञानकर्मभ्यां अभ्यवायसाभिरुपपद्यते

गी॰ र॰ ३६ यदाहुः विजयत्वात्मैवैतम मानंदो व्यज्यते च यः य एव निरवविभुत्वादितेनात्मानैवमुच्यते ब्रह्मलोकमभिसंपद्यत इति श्रुतिरपि तत्सम्याभिन्न
भिव्यक्तिपुर्ष्यो यदेवं वदंति अभिव्यक्तिस्तु मतिविंधकापनयेन यथा लोकस्यांधकारापनयेन घटव्यंग्यकतात येह स्तोप्यानंदस्य ज्ञा
नस्य च शुभाशुभकर्ममतिवंधात्स्वं धे विषयविषयिभावो न जायत इति तदपनयनमेव तथा च काशिकाकृतस्तत्सिद्धमानंदात्मा
स्मुक्षितैपनिषद्शानकर्मोपायो मोक्षो निरस्य यमानंदो व्यज्यते न तु स्वर्गवत्कार्य इति यन्तु तत्साक्षात्कारस्य कारणमिति तन्न
36 वनुत यापिकरणांकिमितिवाच्यं न तु मन एव तथा अवागमनाः इति श्रुतिविरोधादिति पार्थसारथिमिश्रोक्तिविलवांस्तदसत आ
नंदसाक्षात्कारो मुक्तिस्तत्माकालीने मतः संवंधेपि मोक्षावस्थामधिकृत्य सोल्कमनस्कत्वं न विरुध्यते अथ विकल्पकात्मकमनः
मति वेधिके यश्रुतिः कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येवं श्रुतस्वरूपेण तादृशधर्माभावे मनसोप्यभावात् यत्वात्म
न आनंदरूपत्वेमानमेव नास्ति आनंदशब्दश्च गीतश्रवणस्त्रियालिंगनचंद्रदर्शनमधुरास्वादादिजन्य आह्लादमेवाभिधत्ते
न चैवं रूपत्वेत्यात्मनो मानमस्ति यथा हि वैषयिकसुखेष्वानंदरूपत्वं प्रत्यभिजानीमो नैवमात्मनि प्रत्यभिज्ञात्माकं यत्र एव संवि
त्रानमानंदं ब्रह्मेति तद्धर्मधर्मिणोरभेदाश्रीलोत्पलादिवत्सामानाधिकरण्यं दृष्टव्य गुणमात्रविवक्षानामपि शब्दानां गुणिनि राम
प्रयोगो यथा शीतो मधुरो रसः स्निग्धो गुरुश्चेत्रिरसशब्दस्पदद्व्यः यथा शीतादिशब्दसामानाधिकरण्यानुपपत्तेः किंचानंदत्वेवाप ३६

लब्ध्वानंदी भवतीति मलपस्य पनिर्देशात् तस्मानंदयोर्भेदो न युज्यते तथानंदं ब्रह्मणो विद्वान्नएको ब्रह्मण आनंद इति षष्ठ्या आ
नंदस्य ब्रह्मातिरिच्यते किंच न मे सुखं किंचिदपि किंतु दुःखमेव केवलं ममेति हृदयाभावे दुःखानुभवे चानुभूयमानस्यात्मनः कथमानं
दरूपता स्यात् किंच सुषुप्तिमुक्त्योर्मुक्तिः केवलत्वं सत्तानुहृत्सन्नन्नह्निमात्रं तु भिन्नमित्यवचो संमतिप सुषुप्त्यनुभवस्यास्माक
मप्यस्ति तथा च श्रुतिः एताः प्रजा अहरहर्ब्रह्मलोकं यान्ति अहरहर्गच्छंतीति न चास्माकं तत्रानंदानुभवोस्ति तस्मान्निरानं
द एव मोक्ष इति केचिदाहुः तदसमीचीनं तथाहि प्रिये हि भेदाभेदवादिनश्च भय मप्यपपन्नं आनंदत्वेनाननुभवस्य भिन्नत्वात् प
र्यवे ष्वपि क एवानंदपदाभिधेयस्तत्र मानोऽयं कथ्यात्मिकाभिमानिका ह्लादिपितत्वयोगात् तस्मात्सर्वसाधारणमा
नंदसाधारणानिवाहत्वधिकारणमायेन तत्त्वमपदैर्विदितमपोनाभिलोपिवर्णनेन तदाको विरोधः रसं ह्येवायं लब्ध्वेति श्रुपमपोऽश्नुति
दृष्टाङ्गी वस्यानंदत्वतानन्तज्ञगद्रूपास्यानंदरूपतायावाधिका आनंदं ब्रह्मेति विजानात्सुपनीत्सर्थे न चानंद आनंदपि तु स्वमर्थरूपसा
यो ब्रह्मण आनंदरूपतास्ति हेतुनि न परस्तादुलापवैकल्पिकमात्र पाणि पं आनंदं ब्रह्मणो विद्वान्निसत्र च ब्रह्मपदमनन्यग
तिकतयाजीवपरं षष्ठ्यार्थश्चालायत्वं एवमेको ब्रह्मण आनंद इत्यत्रजीवस्यमोक्षे यश्च माणास्यानंदः स एक एव न तु वैषयिकादिवन्नो
नेकार्थः सुषुप्त्यनुभवे त्वेवमतत्त्वमहमसाक्षिमिति परामर्शात्सुखमित्यस्य स्वरूपदित्यर्थः तद्ब्रह्मत्वं ब्रह्मात्मकमेवैषयिकसवि

मी. ६०
३७
37

घपसंनिकर्षेणाभावात्ततस्त्वमिथ्यावाद एवायं नानंदानुभवस्त्वत्रास्तीति यत्तु न मे सुखं किंचिदितितदभिमतस्यानुभवादेव यत्तु सुखवि
शिष्टात्मानुभवः पुरुषार्थो न तु सुखमात्रानुभवो न च सुखमात्रात्मानुभवः संभवति विज्ञातारमरे केन विजानीयादिति श्रुत्यैव निषेधादिति नह्यति
नु दुःखस्यैव पुरुषार्थत्वात् इष्यते तु सुखं नित्यं समस्तेतत नु कामात्मकं गुणगणपमेदत्वादिनां सुखेन सह वैशिष्ट्यमस्ति वस्तुतस्तु सुखत्वमात्मात्
क्रियमाणत्वेन कदाचित्सुखपुरुषार्थस्यानेवहितसुखस्यापुरुषार्थत्वान्न तु सुखविशिष्टस्यात्मसाक्षात्कारत्वेन न च सुखस्य मासाक्षात्कारदशायामात्मापि स्फुरती
त्यनुभवसाक्षिकमेतत मुक्तेरप्युवहितत्वमात्र कालेजातस्यैव तात्साक्षात्कारस्यमुक्तत्वस्यापाम नुहृतिस्वीकारेणाश्रुतिविरोधाभावात्त्वम् अशरीरत्वाव
त्तं तेन प्रियाप्रिये स्पृशतः स्पृशतः प्रियाप्रिये सहचर्याद्वेषुपिकादिसुखपरः हेतुनिर्देशोऽप्युपपन्नोऽशरीर इति भोगो हि जायमानः शरीरावच्छेदेन जा
यते तदभावे च कथमात्मानंदस्पर्शतः कथमात्मसुखस्यप्रयोजनतामिति भावः मोक्षस्यानंदरूपतानु सुखवर्गः स्यात्तर्वान्मुमविशिष्टत्वादिति
न यतो भगवतो जैमिनेरपि सम्मतः एवपदं त्वत्राशंकोऽवान्मुमुक्षुमपि स्वप्राप्ति स्वर्गपदं चातिशयिनस्सुखवाचित्व साक्षेपिकातिशयिपुण्यकर्म
मात्रस्य फलं मोक्षस्तु नापेक्षिकातिशयप्रशालीत्वान्न कर्मेतोः फलमित्याशयः इदं तु विचार्यं जीवस्यानित्य आनंदो नित्यो स्येव कुतः सिद्धया
वेति हि वाक्यानि ब्रह्मानंदपराणि ब्रह्मणश्चरूपतो वा रमानि तानि जातानि जीवंति यत्प्रयन्त्यभिसंविशंतीति तद्ब्रह्म तद्विजिज्ञासस्वेति वाक्या
द्रूपास्यमात्रपरः प्रत्यानंदं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमिति श्रुतिरेवमभाणांतरावि हरुं सुहृदेपि मम मा गामेव काशिकायां श्राका शिरस्तु चरितमि राम०
३७

ग्रैस्तदपि जगदुपास्यपरमेवप्रतिभातीति चेन्न तस्य संबंधाभावान्मोऽस्मिन् प्रतिष्ठितमिति सर्वस्याविशेषेन तत्प्रतिपादनं नोपपद्यत इत्यत्र ब्रह्मपदेन जीवस्य
लक्षणापित्वात् आनंदमित्यानंदवृत्तिलाक्षणिकं मधुरः स्निग्धो रस इतिवत् छांदसो वा लिंगव्यत्यासः सुपधर्मः मतयो याभ्यसयोतत्वेनानंद
घनत्वाद्रूपमिति वार्थः ब्रह्मलोकमभिसंपद्यत इति वाक्यशेषाच्च भावापत्तिः फलं श्रूयते तथा ब्रह्मवेद ब्रह्मैव भवतीत्यादिवाक्याच्च न च ब्रह्मस्वरू
पता भवनं योग्यमिति ब्रह्मणोऽपि आनंदः सजीवे सा भागाक्रियमाणात्मना मापतेत तस्याखाल्काशवान्न भवतीति फलितोऽर्थः ततश्च जीवे पूर्ववृत्ति
सहत्वविरहेऽपि नस्तातिरिति तु नवीनाः स्वसमानाधिकरणदुःखाधिकरणक्षणाद्वृत्तिदुःखध्वंसो मोक्षस्य चोक्तेष्टत्वाविषयत्वात् तत्साधनतया
प्रतियोगिनो दुःखस्यापि उपादेयत्वमिति तु केचित् तदपि वेदविरोधादुपेक्ष्यमिति न तु प्रतियोगितापि पदार्थांतरं न हि स्वरूपसंबंधेन तत्कार्य
निर्वाहः संभवति तथा हि घटो नास्तीत्यत्राभावेन सह घटस्य कः संबंधो घट एवेति चेन्न घटस्य संबंधत्वे प्रमाणाभावात् घटत्वमिव न वा संभवति
संयोगसमवाययोरेव संबंधव्यवहारस्य लोकसिद्धत्वात् भाक्त इह संबंधव्यवहार इति चेत्तर्हि नास्त्येव संबंध इत्यापतेत् किंच घटस्याभावत्वे च स्वात्मं
क्षेणज्ञानतोऽपि न हे घटो नेत्यत्रान्योन्याभावस्यापि तथा प्रतीतेः इति व्याप्तेः स्वं न वा अन्योन्याभावभिन्न इति सा भावत्वे तत्राप्यनुयोगस्य सत्त्वात् भवन्मते घटा
देरेवाभावत्वेन तस्य नित्यत्वाभावाच्च घटोऽपि ज्ञानात्मनास्तीत्यत इति चेत् तत्र तथापि तद्घटत्वसर्गाभावाव्याप्तिः प्रागभावध्वंसयोरव्याप्तिश्च तर्हि नित्य
घटे नष्टे घटो नेति चेद् स्वत्वे वा तदन्योन्याभावभेदो न संभवति सर्वस्यैवाभावस्य भावात्मकस्यान्योन्याभावात्मकतापत्तेः लोकानात् नहि अन्योन्याभावत्वे

मी॰ र॰ त्वस्य तामभावत्वमेव तन्नैव तत्स्वरूपं तु नत्र दसंताभावत्वमेव अस्ति हि प्रागभावप्रध्वंसात्यंताभावेष्वान्योन्याभावत्वाभावः न चाभावेनाभावः सं
३८ भवति भावांतरमभावो हीति सिद्धांतादिति वाच्यं तेषामपि भावांतरात्मकतयांगीकारादिति चेदस्त्वेवं तथापि सदातनसंसर्गाभावत्वमसं
ताभावत्वमिति तन्मते विशेष संसर्गाभावत्वमप्यापि न निरुक्तं प्रतियोगिवृत्तित्वाभावोऽत्यंताभाव इति चेन्नघटस्य कस्यचित्प्रतियोगिमयो भावो वृत्ते
तद्रसतिव्याप्तिः स्वप्रतियोगी सत्त्वाव संतानानुगमः अन्योन्याभावत्वाहतिरन्योन्याभावत्वाभाव इति तन्निर्वाच्यमिति चेत्किं हि तत्संसर्गा
38 भावत्वात्यंताभावत्वातिरिक्तं तादात्म्यावच्छिन्नप्रतियोगिताकत्वमिति चेन्न तादात्म्यघटितद्वित्वसाधारणधर्मत्वादननुगमः किंच घ
टेऽन्योन्याभावेपीत्यव्याप्तिः अत एव प्रतियोगिसमानाधिकरणोऽभावोऽन्योन्याभावः सामानाधिकरण्यमेककालावच्छेदेनैकदेशे एकाव
च्छेदेन वर्तमानत्वं तेन ध्वंसप्रागभावावाप्यत्यंताभावेषु नातिव्याप्तिरित्यपि निरस्तं घटस्य कस्यचित्प्रतियोगिनासामानाधिकरण्यसा
तिप्रसक्तत्वात्स्वप्रतियोगिसामानाधिकरण्यस्याननुगतत्वेन माऽगुक्तदोषात्तद्धारासंबंधांतरेणाप्रतियोगिप्रतिसंबंधांतरेणासं
सर्गाभावे गतिमान्निरस्य एकसंबंधावच्छिन्नत्वविवक्षायामपि गगनान्योन्याभावाव्याप्तिः गगनाधिकरणाप्रसिद्धेः अथ प्रतियोग्यवृत्तिः
सार्वदिक्काभावोऽन्योन्याभावः न च कालान्योन्याभावाव्याप्तिः दैशिकसंबंधेन तद्वत्त्वाभावस्य विवक्षितत्वात् इति चेन्न एवंस्वलक्षणे तद्दोष एमं
तादवस्थ्यात् स्वमते तत्तायामपि वस्तुत्वजातेः स्वीकारेपि वस्तुत्वाभावस्य संबंधांतरावच्छिन्नस्य तत्ताद्वृत्तित्वाभावात्तत्रातिव्याप्त्यापत्तेश्च ३८

एतेन तादात्म्यारोपजन्यप्रतीतिकाभावत्वमन्योन्याभावत्वमित्यपि परास्तं तादात्म्यस्याननुगतत्वात् आरोप्यसहेतुत्वे मानाभावात् बाधा
त्त्व तथाहि न तावदनाहार्यारोपत्वं यातस्याभावग्रहविरोधित्वात् नाप्याहार्यारोपत्वं तस्याभावग्रहात् प्रागसत्त्वात् पक्षेवं सति संसर्गाभा
वकालेऽन्योन्याभावोपि गृह्येतेति तन्नेत्यापत्तिः अथ वारोपनियामकमेव तन्नियामकं तस्योभयसिद्धत्वात् प्रागपि चानुमानिकाभावग्रहे
तस्य कारणतानकत्वादितिचेत् तथापि तत्र सोऽभावाव्याप्तिः अथ संसर्गाभावान्यविषयत्वं तदितरेतराभावः किंच ज्ञानघटितमन्यतावच्छेदकं
न तावदन्योन्याभावज्ञानत्वं तस्य प्रथमतोऽन्योन्याभावत्वाज्ञानेऽज्ञानात् न च तादात्म्यारोपानन्तरं याऽभावबुद्धिर्जायते तद्बुद्धित्वं तस्यामे
न्याभावत्वाज्ञानेऽपि शशकग्रहे वस्तुतोऽन्योन्याभावबुद्धेरेव तथात्वादिति वाच्यं तथापि जन्यत्वावच्छेदकं पदितस्त्वानत्वे तथा सति तज्ज्ञाना
विषयेऽव्याप्तिः अथ संसर्गाभावान्यविषयत्वं नदेतरेतराभावः किंच ज्ञानघटितमिदमन्योन्याभावत्वमतीन्द्रियज्ञानवादिनां नमतस्य योग्या
नुपलब्धिग्राह्यत्वं नापि मतस्य ज्ञानवादिनामपि चाक्षुषमविनुमर्हति अथ संबंधावच्छिन्नप्रतियोगिताकाभावत्वं तथा च संबंधावच्छिन्न
प्रतियोगिकत्वमन्यमभिन्नभावत्वमेवान्योन्याभावत्वं ध्वंसस्य प्रागभावस्य च प्रतियोगितानसंबंधावच्छिन्नेति तत्रातिव्याप्तिवारणाय निरू
पकमिति चेन्न विशेषणाविशेष्यभिन्नत्वे सति विशिष्टप्रत्यक्षविषयत्वं हि संबंधत्वं तथा चान्योन्याश्रयः अथ संबंधत्वमनवच्छेदकोपाधिः तर्हि त
दपि पदार्थान्तरमिति विभागव्याघात इति चेन्न मनसि वक्ष्यते तत्रेति चेत् सत्येवं तथापि संबंधत्वे तादात्म्ये व्याप्तिरव्यभेदेनाविशिष्टज्ञाने तस्मत

मी॰ र॰ ३९ यत्वात् तद्घतारात्मनं घटत्वादिति तैरिति कौ मसमयोन्याभावस्यापि संसर्गावच्छिन्नप्रतियोगिताकत्वं दुर्वारं अपसंवंधस्यावच्छेदकतायामत्वमेवे
तिवेन्न अरोपस्य हेतुतायां हृषितमापत्वात् तत्तु स्वमाप्यत्वात् विनष्टघटस्य घटप्रमित्यनंतरं घटध्वंसस्य प्रत्यक्षे व्यभिचाराच्च किंच नित्यत्वं प्रागभावाप्र
तियोगित्वे सति ध्वंसाप्रतियोगित्वं धान्याधारसमवायानाधारोऽभावः प्रागभावो न तु प्रतियोगिजनको ऽभावः कारणतायामनन्यथासिद्ध
येनियमांशेकान्योन्याभावगर्भत्वात् ध्वंसस्य प्रागभावप्रतियोग्यभावः न तु जन्याभावो न्योन्याभावगर्भतापत्तेरिति चेन्न गंधानाधारत्वं परि
गंधाभावाधारत्वं तदा जलाघवच्छेदेनाप्यमपि समपक्षत्वेन्नित दृष्टित्वात् प्रागभावस्यासंभवः अतएव गंधाधारत्वाभाववत्वमपि न यदि च
गंधाधारभिन्नत्वं तदात्माश्रयादिः नतु मीमांसकानां तादृशसमयेऽप्यसंभवः न बाध्वंसादिप्रसंग विनाततस्माशिद्धिः ननु गंधत्वस्याधि
करणानधिकरणसमयवृत्तिकार्यमात्रवृत्तिजातित्वादिति तत्किंचिद्भिरिति चेन्न गंधवत्त्वस्य पक्षतावच्छेदकस्यान्योन्याभावगर्भत्वात् स्या
द्याप्रसिद्धिश्च स्वत्वाननुगमात् जातित्वस्य नित्यत्वघटितत्वात् समवायस्याप्रसिद्धेश्च अथ नित्यत्वं गोत्वव्यापकत्वं इदं च कालिकं
यात्वमिति चेन्न तद्भिन्नसमानाधिकरणासंताभावाप्रतियोगित्वं न चान्योन्याभावः कोपि तथा सर्वस्यैव तत्प्रतियोगितावच्छेदात्मक
त्वात्संताभावसमानाधिकरणत्वात् न चातएव प्रतियोग्यसमानाधिकरणसंताभावविशेषणं देयमिति वाच्यं तद्भिन्नप्रतियोग्य एमं
धिकरणावृत्तित्वाभावः सर्वेषामभावानां प्रतियोग्यधिकरणे महाकालेवृत्तेः नापि प्रतियोग्यभावाधिकरणावृत्तित्वं वैयर्थ्यात् असंता ३९

39

मी० र०
४०
40

भावस्याप्यनिरुक्तेश्चनचमतियोग्याधिकरणाभिमतइतित्वं अत्राप्यापत्तेः ~~तस्मात्संसर्गाभाव~~त्वान्योन्याभावत्वमतीतिवत्तासद

र्पांतरेइतिनचैवंतद्भ्रान्त्येश्च तर्भावेपि तु शक्यैतस्मैकमात्रवृत्तित्वात् अन्यथासामान्यापत्तापापत्तेरितिचेदत्रब्रूमः अनयोरभावत्वव्याप

योरभावत्ववद्भावपदार्थयोरेवांतर्भावः योग्यानुपलब्धिगम्यत्वेनैवाभावस्यविभागात् प्रागभावध्वंसत्वे निरुक्ते एवत्वावानुक्ते संबं

धत्वंतुसामान्यांतर्गतमनुगतमसत्यविशुद्धत्वमेवसामान्यत्वंपदार्थविभाजकंतदाश्रयोद्विविधः भावमात्रवृत्तित्वादितरश्चआद्योजा

तिरितिव्यवह्रियते अंत्यस्यत्वंचोपाधिरितिशक्तिरपितत्स्वेनतदंतर्भूतैवास्त्विति चेन्नतस्यायास्तन्नवृत्तितापात्ययुपगमात् इति पस्यप्रमेय

स्यैतास्यानेकवपितुमिच्छास्ते विद्यालंकृतिकृतिनः कृतिरेवाकस्यतांतेन १ किंचाथुनाथस्यकृतिनः कृतिः कौशलशालिनी मी

मांसातत्वजिज्ञासोर्भवितानंददायिनी २ ॥ ॥ इतिविद्यालंकारश्रीरघुनाथभट्टाचार्यकृते मीमांसारत्नेमनागप्रमेयविवि

रणात्मकेप्रमेयपारायणाख्यो द्वितीयः परिच्छेदः समाप्तः श्रीरामः श्रीसंवत् १८०४ ॥ २ ॥

रम०
४०

वस्ता ८ अंक ४३५८

मीमांसा:

न्याय